Title महाक्षेत्रार्चाविधिः

Author +

Extent ३ Age +

Subject तन्त्रम् , संपूर्णम्

S670
F-4
1 Complete

नं० ५६६०-घ

Dhar


महाद्वेत्रार्चाविधिः (तन्त्रम्)

पत्राणि ३ (त्रीणि) (सम्पूर्णम्)

नं० ~~१२१०~~ ५६६०-घ २

नं. १२१० के
महाभैरवाचो विधि:
३ पत्राणि
[illegible]

१६७
१६२



महादेवार्चाविधिः ॥

म॰
क्षे॰
१

ॐ श्रीगुरवे शिवार्यै नमः श्रीरस्तु अथ महाक्षेत्रार्चा तत्र श्रीमान्
साधको ब्राह्मे मुहूर्ते चोत्थाय विहिताह्निकः श्मशानार्चनसंभा
रं हकारपंचकं चगंधादिकं समादाय सानुगः सवीरो रात्रिमुखे वी
रभूमिं व्रजेत् तत्र भूमौ सप्तपादानाभूमिमुत्सृज्य श्मशानवेलां
नोल्लंघयेत् तत्र संभारं संस्थाप्य स्वहस्तपादौ प्रक्षाल्य त्रिराचम्य
प्राणायामत्रयं विधाय पुनराचम्य स्वमूलऋष्यादिकारषडंगा
न्विधाय मूलमष्टोत्तरशतं जपेत् यथाशक्ति जपं कृत्वा दे
वीं सशिवां गुरूंश्च ध्यात्वा यदि कवचसहस्रनामस्तवराजामुखा
ग्रे तिष्ठंति तदा मूलमुच्चरन् सप्तपदमात्रां वेलामुल्लंघ्य श्म
शानमंडलं प्रदक्षिणनिकृत्वा प्रविश्य चितां प्रणमेत् यथा।

ज्वालाकरालवदने कल्पांतदहनप्रिये प्राणप्राणालयोद्भूते चि

ते मेऽनुग्रहं कुरु इति चिंतां नत्वा यथाचारं प्रशस्तान् भूतभै

रवान् संमुखपृष्ठयोर्धृत्वा पूजामारभेत् यथा अस्य श्रीश्म

शानपूजामंत्रस्य महाकालभैरवऋषिः उष्णिक् छंदः श्रीश्म।

शानकालिकादेवता क्रीं बीजं हूं शक्तिः क्रीं कीलकं श्रीधर्मा

र्थकाममोक्षार्थे श्मशानपूजायां विनियोगः इति कृतांजलिः स्मृ

त्वा न्यसेत् ऋष्यादि ॐ क्रामिति षडंगौ यथाशक्ति स्वासनशोध

नभूतशुद्धि प्राणप्रतिष्ठां तमीतृकाबहिर्मातृकान्यासान् स्वमूल

ऋष्यादिकरषडंगन्यासांश्च कृत्वा स्वहृदयकमले मानसोपचा

रैराराध्य चितायां ईशाने चतुरस्रां वेदीं विधाय तत्र श्रीचक्रं विलि

म॰
दे॰
७
2

ख्य विभाव्यवा तत्रदेवींबिंदौध्यात्वा कारणपूजनादिपात्रस्थाप-
नादिकंविधाय आदौदेवींपंचोपचारेणसंपूज्य नवग्रहश्रीपा
दुकांपूजयामिनमः तर्पयामिनमः इतिनवग्रहान्संपूज्य ॐ
ह्रींवटुकायनमः वटुकश्रीपादुकांपूजयामिनमः तर्पयामिन
मः इतिपूर्वेवटुकंभूतभैरवान्संपूजयेत् यथा ॐम्रींमहोग्रा
यनमः ॐश्रींमदालसायैनमः पूर्वे रविं १ ॐश्रींचित्रांगदायनमः
ॐश्रींचित्रिण्यैनमः उत्तरे चं २ ॐह्रींचंडायनमः ॐह्रींचंड्यैनमः
ईशाने भौ॰ ३ ॐहौंःभास्वतेनमः ॐहौंःप्रभायैनमः वायव्ये बु॰ ४
ॐलांलोलाक्षायनमः ॐलांलोलायैनमः आग्नेये जी॰ ५ ॐभैं-
भूतेशायनमः ॐभैंभूतधात्र्यैनमः दक्षिणे शु॰ ६ ॐक्रींकराला

यनमः ॐ ह्रीं करालिन्यै नमः नैर्ऋते श्रा० ७ ॐ ह्रीं श्रीं भीमाय नमः ॐ ह्रीं श्रीं भीमरूपायै नमः श्रा ८ इति शुक्लपक्षे कृष्णपक्षे तु विपरीतक्रमेण भीमादि महोग्रान्तं पूजयेत् इति यथावारक्रमेण गंधाक्षतपुष्पैः भूतभैरवानभ्यर्च्य पुनर्विंदौ स्वदेवीं संपूज्य-यथाशक्ति जपं कृत्वा श्रीदेव्यै समर्प्य (देवीं विसृज्य) चिताग्नौ दशांशं होमं कृत्वा कवचसहस्रनामस्तवराजपाठादिकं विधाय तदपि समर्प्य तत्र वटुकाभिः संतर्प्य देवीं विसृज्य स्वहृदयानीय नवपात्रवंदनं कुर्यात् इति महाक्षेत्रार्चाविधिः समाप्तम् शुभम् ॥ ॥

स·
द्वे·

१५७

नं० ५६६०-घ

महाक्षेत्राचीविधिः (तन्त्रम्)
पत्राणि ३ (त्रीणि) (संपूर्णम्)